# Shree Hanuman Kavach In Marathi PDF

## ॥ श्रीगणेशाय नमः ॥

ॐ अस्य श्रीपञ्चमुखहनुमत्कवचमन्त्रस्य ब्रह्मा ऋषिः|
गायत्री छंदः| पञ्चमुख-विराट् हनुमान् देवता|
ह्रीम् बीजम्| श्रीम् शक्तिः| क्रौम् कीलकम्|
क्रूम् कवचम्| क्रैम् अस्त्राय फट् | इति दिग्बन्धः|

## ॥ श्री गरुड उवाच ॥

अथ ध्यानं प्रवक्ष्यामि शृणु सर्वांगसुंदर |
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥१॥

पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम् |
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम् ॥२॥

पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् |
दंष्ट्राकरालवदनं भ्रुकुटिकुटिलेक्षणम्॥३॥

अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् |
अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ॥४॥

पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महाबलम् |
सर्वनागप्रशमनं विषभूतादिकृन्तनम्॥५॥

उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम् |
पातालसिंहवेतालज्वररोगादिकृन्तनम् ॥६॥

ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम् |
येन वक्त्रेण विप्रेन्द्र तारकाख्यं महासुरम् ॥७॥

जघान शरणं तत्स्यात्सर्वशत्रुहरं परम् |
ध्यात्वा पञ्चमुखं रुद्रं हनुमन्तं दयानिधिम् ॥८॥

खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुशपर्वतम् |
मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुम् ॥९॥

भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुंगवम् |

एतान्यायुधजालानि धारयन्तं भजाम्यहम् ॥१०॥

प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् |
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ॥११॥

सर्वाश्चर्यमयं देवं हनुमद्विश्वतो मुखम् ॥
पञ्चास्यमच्युतमनेकविचित्रवर्णवक्त्रं
शशाङ्कशिखरं कपिराजवर्यम् |
पीताम्बरादिमुकुटैरुपशोभिताङ्गं
पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥१२॥

मर्कटेशं महोत्साहं सर्वशत्रुहरं परम् |
शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर ॥१३॥

ॐ हरिमर्कट मर्कट मन्त्रमिदं परिलिख्यति लिख्यति वामतले |
यदि नश्यति नश्यति शत्रुकुलं यदि मुञ्चति मुञ्चति वामलता ॥१४॥

ॐ हरिमर्कटाय स्वाहा |
ॐ नमो भगवते पंचवदनाय पूर्वापिमुखाय
सकलशत्रुसंहारकाय स्वाहा ।

ॐ नमो भगवते पंचवदनाय दक्षिणमुखाय करालवदनाय
नरसिंहाय सकलभूतप्रथनाय स्वाहा ।

ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गरुदनाय
सकलविशाराय स्वाहा ।

ॐ नमो भगवते पंचवदनयोत्तरमुखायदिव्रहाय
सकल संपत्काराय स्वाहा ।

ॐ नमो भगवते पंचवदनयोर्ध्वमुखाय हयग्रीवाय
सकलजनवशंकराय स्वाहा ।

ओम अस्य श्री पंचमुखहनुमन्त्रस्य श्रीरामचंद्र
ऋषी:। अनुष्टुपंडह। पाच मुखी हनुमान देवता।

हनुमानिती बीजम । वायुपुत्र इति शक्तीः । अंजनिसुत इति कीलकं ।

श्रीरामदूतहनुमतप्रसादसिद्धार्थे जपे विनियोगः।
इति ऋष्यादिकं विन्यासेत ।

ॐ अंजनिसुताय अंगुष्ठभ्या नमः ।
ओम रुद्रमूर्तये तर्जनीभ्यं नमः ।
ॐ वायुपुत्राय मध्यभ्यां नमः ।
ॐ अग्निगर्भाय अनामिकाभ्यां नमः ।
ॐ रामदूताय कनिष्टिकाभ्यां नमः ।
ॐ पंचमुखानुमते कर्तळकर राष्ट्राभ्यं नमः ।
इति कारन्यासः ।

ॐ अंजनिसुताय हृदयाय नमः ।
ॐ रुद्रमूर्तये शिरसे स्वाहा ।
ॐ वायुपुत्रय शिखराय वशात् ।
ओम अग्निगर्भय कवचय हम ।
ओम रामदूताय नेत्रत्रय वौषत ।
ओम पंचमुखानुमते अस्त्र फाट ।
पंचमुखी स्वाहा।
इति दिग्बंध।

## अथ ध्यानम् ।

वंदे वानर्नरसिंहखग्रात्क्रोडाश्ववक्त्रणवितम्
दिव्यलंकारणं त्रिपंचयनं देदीप्यमानं रुचा।
हस्तजैरशिखेतपुस्तकसुधाकुंभंकुशाद्रिमहलामन
खट्वांगं फणीभूरुहं दशभुजं सर्वरिविरापहम् ।

## अथ मन्त्रः ।

ॐ श्रीरामदूतायंजनेय वैयपुत्रय महाबलपरक्रमय
सीतेचे दुःख, लंकेचे मरण, महाबळ प्रचंडचे
फाल्गुनसखाय कोलाहलसकलब्रह्मांडविश्वरूपया
सप्तसमुद्रनिर्लंघनाय पिंगलनयमितविक्रमाया
सूर्याम्बिबफलसेवनाय दुष्ट निवारणाय दृष्टी निरलकृताय
संजीवनीसंजीवितांगदलक्ष्मणमहाकपिसंयप्रणादये
दशकंठविध्वंसनाय रमेशतया महाफाल्गुणसखाया सीतेसह-
रामवरप्रदाय शतप्रयोगगमपंचमुखवीरहनुमन्त्रजपे विनियोगः।

ॐ हरिमर्कटमर्कटाय बंबंबंबंबं वौषट् स्वाहा ।
ॐ हरिमर्कटमर्कटाय फंफंफंफंफं फट् स्वाहा ।
ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें मारणाय स्वाहा ।
ॐ हरिमर्कटमर्कटाय लुंलुंलुंलुंलुं आकर्षितसकलसम्पत्कराय स्वाहा ।
ॐ हरिमर्कटमर्कटाय धंधंधंधंधं शत्रुस्तम्भनाय स्वाहा ।
ॐ टंटंटंटंटं कूर्ममूर्तये पञ्चमुखवीरहनुमते
परयन्त्रपरतन्त्रोच्चाटनाय स्वाहा ।

ॐ कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं
तंथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहं
ळंक्षं स्वाहा ।
इति दिग्बन्धः ।

ॐ पूर्वकपिमुखाय पञ्चमुखहनुमते टंटंटंटंटं
सकलशत्रुसंहरणाय स्वाहा ।

ॐ दक्षिणमुखाय पञ्चमुखहनुमते करालवदनाय नरसिंहाय
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सकलभूतप्रेतदमनाय स्वाहा ।
ॐ पश्चिममुखाय गरुडाननाय पञ्चमुखहनुमते मंमंमंमंमं
सकलविषहराय स्वाहा ।

ॐ उत्तरमुखायादिवराहाय लंलंलंलंलं नृसिंहाय नीलकण्ठमूर्तये
पञ्चमुखहनुमते स्वाहा ।

ॐ उर्ध्वमुखाय हयग्रीवाय रुंरुंरुंरुंरुं रुद्रमूर्तये
सकलप्रयोजननिर्वाहकाय स्वाहा ।

ॐ अञ्जनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय
श्रीरामचन्द्रकृपापादुकाय महावीर्यप्रमथनाय ब्रह्माण्डनाथाय
कामदाय पञ्चमुखवीरहनुमते स्वाहा ।

भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिन्यन्तरिक्षग्रह-
परयन्त्रपरतन्त्रोच्चटनाय स्वाहा ।
सकलप्रयोजननिर्वाहकाय पञ्चमुखवीरहनुमते
श्रीरामचन्द्रवरप्रसादाय जंजंजंजंजं स्वाहा ।
इदं कवचं पठित्वा तु महाकवचं पठेन्नरः ।
एकवारं जपेत्स्तोत्रं सर्वशत्रुनिवारणम् ॥ १५॥

द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम् ।
त्रिवारं च पठेन्नित्यं सर्वसम्पत्करं शुभम् ॥ १६॥

चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् ।
पञ्चवारं पठेन्नित्यं सर्वलोकवशङ्करम् ॥ १७॥

षड्वारं च पठेन्नित्यं सर्वदेववशङ्करम् ।
सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ॥ १८॥

अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम् ।
नववारं पठेन्नित्यं राजभोगमवाप्नुयात् ॥ १९॥

दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् ।
रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद्ध्रुवम् ॥ २०॥

निर्बलो रोगयुक्तश्च महाव्याध्यादिपीडितः ।
कवचस्मरणेनैव महाबलमवाप्नुयात् ॥ २१॥

॥ इति श्रीसुदर्शनसंहितायां श्रीरामचन्द्रसीताप्रोक्तं
श्रीपञ्चमुखहनुमत्कवचं सम्पूर्णम् ॥

Hanumanchalisapdf.org